শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমদ্গোপালার্য মহাদেশিকৈঃ অনুগৃহীতম্

# ॥ শ্রী অপর্যাপ্তামৃতমঙ্গলাশাসন স্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী অপর্যাপ্তামৃতমঙ্গলাশাসন স্তোত্রম্ ॥

শ্রীকৃষ্ণ দেশিক পদাম্বুজ ভৃঙ্গরাজং
 ৱেদান্ত লক্ষ্মণমুনীন্দ্র কৃপাত্ত বোধম্।
ত্রয্যন্তদেশিক -যতীন্দ্র -শঠারি মূর্তিং
 গোপালদেশিকশিখামণিমাশ্রযামঃ॥

শঠরিপুমুনি সূক্তি শ্রীমদাম্নায ৱাচাং
 অকৃতক ৱচনানাং চাতিকল্যাণ ঘোষৈঃ।
অনুদিনং অভিৱৃদ্ধাং আগমান্তার্য সূক্ত্যা
 শ্রিযং উপচিনু শার্ঙ্গিন্ ৱৈদিকেঽস্মিন্ ৱিমানে॥ **1** ॥

মহিত ৱিহিত ৱেদান্তার্য সম্মান শীলাং
 অপগত তদমিত্রাং অদ্ভুতৈরাসমেতাম্।
নিরৱধি ধন ধান্যাং উৎসৱৈঃ স্ত্যানহর্ষাং
 শ্রিযং উপচিনু শার্ঙ্গিন্ ৱৈদিকেঽস্মিন্ ৱিমানে॥ **2** ॥

শ্রী শার্ঙ্গপাণে যদি তে পরৎৱং
 সত্যা যদি স্যাৎ শ্রুতিরত্র মানম্।
ৱেদান্ত সূরৌ দ্বিষতো জনাংস্ত্ৱং
 শ্রী কুম্ভঘোণে ৱিনিৱারযাশু॥ **3** ॥

পশ্যেম শার্ঙ্গিন্ ! শরদাং শতং ৎৱাং
 পর্যাপ্তিহীনামৃত নামধেযম্।

শ্রীকুম্ভঘোণে নগরোত্তমেঽস্মিন্
    নির্ব্যাকুলাশ্চৈৱ নিরামযাশ্চ ॥ **4** ॥

॥ ইতি শ্রী অপর্যাপ্তামৃতমঙ্গলাশাসন স্তোত্রং সমাপ্তম্ ॥